प्रथमः पाठः

# शिवसङ्कल्पमस्तु

संस्कृतभाषायां वेदाः आदिग्रन्थाः सन्ति। वेदानां मन्त्रेषु धर्म–दर्शन–कला–यज्ञादिविधीनां ज्ञानं तथा च वैदिक–ऋषीणां सार्वभौमिकं चिन्तनं दृश्यते। मन्त्राणां पारायणेन वाक्शुद्धिः मनसः शुद्धिः च भवति। अस्मिन् पाठे मङ्गलाचरणरूपेण यजुर्वेदात् मन्त्राः प्रदत्ताः। प्राणिनां मनः एव सर्वेषां कार्याणां सम्पादकं भवति एतदर्थं मनः शुभं कल्याणप्रदं च भवतु इति कामना मन्त्रेषु कृता।

*ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।*
*दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥1॥*

**अन्वयः** - यत् जाग्रतः दूरम् उदैति, यत् दैवम्, तत् उ सुप्तस्य तथा एव एति, यत् दूरङ्गमम् , यत् ज्योतिषाम् एकं ज्योतिः, तत् मे मनः शिवसङ्कल्पमस्तु।

**शब्दार्थः** -

| | | |
|---|---|---|
| यत् | - | जो (मन) |
| जाग्रतः | - | जाग्रत पुरुष का |
| उदैति | - | जाता है |
| दैवम् | - | आत्मद्रष्टा |
| उ | - | और |
| सुप्तस्य | - | सोए हुए पुरुष का |
| एति | - | लौट आता है |
| दूरङ्गमम् | - | भूत, भविष्य, वर्तमान सबको जानने वाला/दूर जाने वाला |
| ज्योतिषाम् | - | इन्द्रियों का |
| ज्योतिः | - | प्रकाशक |
| शिवसङ्कल्पम् | - | कल्याणकारी सङ्कल्प वाला |
| अस्तु | - | हो |

*ॐ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।*
*यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥2॥*

**अन्वयः** - येन अपसः धीराः मनीषिणः यज्ञे विदथेषु कर्माणि कृण्वन्ति यत् अपूर्वम्, यक्षम्, प्रजानामन्तः, तत् मे मनः शिवसङ्कल्पमस्तु।

**शब्दार्थ: -** येन - जिस मन के द्वारा
अपस: - कर्मवान् पुरुष
विदथेषु - ज्ञान या उपासनाओं में
कृण्वन्ति - करते हैं
यत् - जो मन
अपूर्वम् - सर्वप्रथम उत्पन्न
यक्षम् - यज्ञ सम्पादन में समर्थ या पूज्य

***ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।***
***यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मन: शिवसङ्कल्पमस्तु ॥3॥***

**अन्वय: -** यत् प्रज्ञानम्, उत चेत:, धृति: च यत् प्रजासु अन्त: अमृतं ज्योति:, यस्मात् ऋते किंचन कर्म न क्रियते, तत् मे मन: शिवसङ्कल्पमस्तु ।

**शब्दार्थ: -** प्रज्ञानम् - प्रकर्ष ज्ञान का साधन
उत - तथा
चेत: - सामान्य-विशेष ज्ञान कराने वाला
धृति: - धैर्य स्वरूप
प्रजासु - जीवों में
अन्त: - अन्दर
अमृतम् - अमर
ज्योति: - प्रकाशक है
ऋते - बिना
किंचन - कुछ भी
क्रियते - किया जाता है

***ॐ येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।***
***येन यज्ञस्तायते सप्तहोता तन्मे मन: शिवसङ्कल्पमस्तु ॥4॥***

**अन्वय: -** येन अमृतेन इदं भूतं भुवनं भविष्यत् सर्वम् परिगृहीतम्, येन सप्तहोता यज्ञ: तायते, तत् मे मन: शिवसङ्कल्पमस्तु ।

**शब्दार्थ: -** अमृतेन - अमर मन के द्वारा
भूतम् - भूतकाल का
भुवनम् - वर्तमान काल का
भविष्यत् - भविष्य काल का
सर्वम् - सांसारिक सारी वस्तुएँ
परिगृहीतम् - जाना जाता है
सप्तहोता - सात होताओं वाला
तायते - सम्पादित किया जाता है

*ॐ यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।*
*यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥5॥*

**अन्वयः** - यस्मिन् ऋचः, साम, यजूंषि रथनाभौ अराः इव प्रतिष्ठिताः, यस्मिन् प्रजानां सर्वं चित्तम् ओतम् तत् मे मनः शिवसङ्कल्पमस्तु ।

**शब्दार्थः** -

| | | |
|---|---|---|
| यस्मिन् | - | जिस मन में |
| ऋचः | - | ऋचाएँ |
| साम | - | साम मन्त्र |
| यजूंषि | - | यजुर्मन्त्र |
| रथनाभौ | - | रथ चक्र की नाभि में |
| अराः इव | - | तीलियों के समान |
| प्रजानाम् | - | प्राणियों का |
| चित्तम् | - | ज्ञान |
| ओतम् | - | भरा है |

## अभ्यासः

1. **एकपदेन उत्तरं लिखत -**
   (क) मनः जाग्रतः कुत्र उदैति ?
   (ख) प्रजानाम् अन्तः स्थितं किम् ?
   (ग) मनसः ऋते किंचन किं न क्रियते ?
2. **एकवाक्येन उत्तरं लिखत -**
   (क) मे मनः किम् अस्तु ?
   (ख) मनसा सप्तहोता कः तायते ?
   (ग) मनसि प्रजानां सर्वं किम् ओतम् ?
3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**
   (क) मनसा के यज्ञे विदथेषु कर्माणि कृण्वन्ति ?
   (ख) अमृतेन किं परिगृहीतम् ?
   (ग) मनसि ऋचः साम यजूंषि कथं प्रतिष्ठिताः ?
4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत -**
   (सप्तहोता, मनः, ऋते)
   (क) तन्मे .......................... शिवसङ्कल्पमस्तु ।
   (ख) यस्मान्न .................................. किंचन कर्म क्रियते ।
   (ग) येन यज्ञस्तायते .................................. ।

**5. यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) मनः ज्योतिषाम् | तथैवैति |
| (ख) येन कर्माण्यपसो | एकं ज्योतिः |
| (ग) तदु सुप्तस्य | मनीषिणः |

**6. शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षम् ''न'' इति लिखत –**

(क) मनः दूरङ्गमम् अस्ति। ☐

(ख) मे मनः शिवसङ्कल्पं न अस्तु। ☐

(ग) मनः अपूर्वम् अस्ति। ☐

**7. एकवचनतः बहुवचने परिवर्तयत –**

| एकवचनम् | बहुवचनम् |
|---|---|
| यथा – धीरः | धीराः |
| (क) यज्ञः | |
| (ख) सुप्तस्य | |
| (ग) येन | |
| (घ) कर्म | |
| (ङ) भुवनम् | |

**8. रेखाङ्कितपदान्याधृत्य प्रदत्तशब्दैः प्रश्ननिर्माणं कुरुत –**

(केन, कस्मिन्, कस्य)

(क) मनः **सुप्तस्य** तथा एव एति।

(ख) **येन** धीराः कर्माणि कृण्वन्ति।

(ग) **यस्मिन्** वेदाः प्रतिष्ठिताः।

## योग्यताविस्तारः –

- पाठे आगतान् मन्त्रान् कण्ठस्थं कुरुत।
- समूहे एकाकी वा मन्त्राणां पाठं कुरुत।